# Shri Guruvayupuresha Suprabhatam 2

# શ્રીગુરુવાયુપુરેશસુપ્રભાતમ્ ૨

## Document Information

Text title : Shri Guruvayupuresha Suprabhatam 2

File name : guruvAyupureshasuprabhAtam2.itx

Category : vishhnu, vAsudevanElayath, krishna, suprabhAta

Location : doc_vishhnu

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

Shri Guruvayupuresha Suprabhatam 2

# શ્રીગુરુવાયુપુરેશસુપ્રભાતમ્ ૨

શ્યામાભિરામશરણીકરણીયમૂર્તે,
કામાનુરૂપફલદામિતપુણ્યકીર્તે ।
સીમાવિહીનકરુણામૃતદિવ્યસિન્ધો,
શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૧॥

ઉન્મીલયસ્વ ભગવન્, નયનારવિન્દ-
માકેકરાતિમધુરાકૃતિ મન્દમન્દમ્ ।
લક્ષ્મીરુપૈતિ નનુ કાલ્યમથી ભવન્તં
શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૨॥

પશ્ચાડપ્લુતા હિમજલે વિમલામ્બરૈષા
તારાસુમાનિ દધતી વિયદબ્જપત્રે ।
સન્તિષ્ઠતે ભવદુપાસનજાગરૂકા
શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૩॥

અભ્યઙ્ગપૂર્વકમનન્ત, તવાભિષેક-
પુણ્યોત્સવં નયનગોચરતાં નિનીષુઃ ।
ભક્તવ્રજોઽત્ર ભરિતોત્સુકભાવમાસ્તે
શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૪॥

તૈલાભિષેકવિમલીકૃતનીલકાન્તિ-
સ્ત્વં ભૂષણૈઃ કતિપયૈઃ પરિશોભિતાઙ્ગ ।
વિભ્રાજસે લલિતશૈશવવેષધારી
શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૫॥

ભક્તાવલી વિગલિતસ્તુતિગીતિભિન્ન-
ઘણ્ટાનિનાદપરિપૂતદિગન્તરાલમ્ ।
ક્ષેત્રં વિભાતિ તવ દીપસહસ્રદીપ્રં
શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૬॥

પૂજાવિધાનમઘનાશનમૌષસં તે
    દ્રષ્ટું સમુત્સુકધિયઃ પુલકાઞ્ચિતાઙ્ગાઃ ।
તિષ્ઠન્તિ ભક્તનિવહાઃ મુકુલત્કરાબ્જાઃ ।
    શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૭॥

ઉદ્ઘટિતે ચ પુરતો ભવતો નિકેત-
    દ્વારે ક્કણન્મધુરઘણ્ટમખણ્ડધામન્ ।
વીક્ષામહે વિમલકોમલવિગ્રહં ત્વાં
    શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૮॥

ઢક્કાનિનાદમધુરાષ્ટપદીમનોજ્ઞ-
    ગાનાનુરઞ્ચિતમુદઞ્ચિતભક્તવૃન્દમ્ ।
વૈકુણ્ઠમન્યદિદમેત્ય વિભો વિભાસિ
    શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૯॥

ધન્યા વયં ભવદુપાશ્રયમેવ યાતા
    મન્વામહે જનિફલં સભવાપ્તમદ્ય ।
નાઽન્યા ગતિસ્ત્વમસિ દેહભૃતાં ચિદાત્મન્!
    શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૧૦॥

જયતિ જયતિ નિત્યં દેવકીપુણ્યકન્દં
    જયતિ જયતિ સાક્ષાત્ બ્રહ્મ સાકારમેકમ્ ।
જયતિ જયતિ શાન્તં સુન્દરં ધામ મુખ્યં
    શ્રીમારુતાલયપતે, તવ સુપ્રભાતમ્ ॥ ૧૧॥

ઇતિ શ્રીવાસુદેવન્ એલયથેન વિરચિતં શ્રીગુરુવાયુપુરેશસુપ્રભાતં સમ્પૂર્ણમ્ ।

*Shri Guruvayupuresha Suprabhatam 2*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*